जगज्जान्विषयांस्त्यक्त्वा काये त्वं तिष्ठ निर्मले ॥ १२ ॥
असन्मयमविद्याया रूपमेव तदेव हि ।
यद्वीक्षिता सती नूनं नश्यत्येव न दृश्यते ॥ १३ ॥
आलोकितं नाम कथमवस्तु किल लभ्यते ।
प्रयत्नेनाऽपि संप्राप्तं मृगतृष्णाम्बुकैरिव ॥ १४ ॥
असदेव सदेवाऽसदज्ञानादस्य सत्यता ।
ज्ञानाद्यथास्थितं वस्तु दृश्यते नश्यति भ्रमः ॥ १५ ॥

हो जानेपर उस दशामें सम्पूर्ण आकारोंसे वर्जित ऐसा स्वरूपज्ञान अवशिष्ट रहता है, जहाँपर परमाणुमें सुमेरु पर्वतकी नाईं आकाश भी स्थूलरूप हो जाता है ॥ १०, ११ ॥

श्रीरामजी, निष्पन्न होनेवाले व्यवहारोंके लिए क्रियाश्रय होनेके कारण व्यावहारिक सत्यभूत भी पदार्थ जहाँ शून्यकी नाईं स्थित हैं, उस निर्मल सत्यस्वरूप ब्रह्मपदमें जगत्में उत्पन्न विषयोंको छोड़कर आप जीवन्मुक्त होकर स्थित रहिए ॥ १२ ॥

अब अविद्याका स्वरूप बतलाते हैं—'असन्मय०' इत्यादिसे।

श्रीरामचन्द्रजी, यतः भलीप्रकार देखी जा रही भी अविद्या नहीं दीख पड़ती, किन्तु नष्ट ही हो जाती है; इसलिए उस अविद्याका वही प्रसिद्ध असद्रूप ही स्वरूप है ॥ १३ ॥

भद्र, [हम यह मानते हैं कि] मृगतृष्णाजल दिखाई दिया, पर उसे प्रयत्नसे भी किन्हीं लोगोंने कहीं पाया क्या ? अर्थात् किसीने कहीं नहीं पाया; ठीक इसीप्रकार (मृगतृष्णाजलके सदृश) जो अवस्तुभूत पदार्थ हैं, भ्रान्तिवश देखे गये भी वे किस तरह पाये जा सकते हैं ? वास्तवमें तो दृष्टान्तभूत मृगतृष्णाजल भी अप्रसिद्ध है, यह भाव है ॥ १४ ॥

असत् पदार्थ ही सत् भासित होता है। उसकी सत्यता असद्रूप अविद्यासे ही है। ज्ञानसे तो जो वस्तु जिस प्रकारकी रहती है, वह उसी प्रकारकी दिखाई देती है और भ्रान्ति नष्ट हो जाती है ॥ १५ ॥

अविद्याया विचारोऽयं जीवपुर्यष्टकादिका ।
अप्यत्यन्तमसत्यायाः कल्पना कल्पिताऽऽत्मनः ॥ १६ ॥
तस्यास्त उपदेशाय सेयं जीवादिकल्पना ।
कृता शास्त्रैः प्रबोधाय तां त्वमेकमनाः शृणु ॥ १७ ॥
जीवत्वमिव संप्राप्ता पुर्यष्टकपदस्थिता ।
कलाकलङ्ककलिता चितिराबोधनोन्मुखी ।
यद्यथा भावयत्याशु तत्तथाऽनुभवत्यलम् ॥ १८ ॥
सत्यो भवत्वसत्यो वा बालेन निशि यक्षकः ।
पञ्चतन्मात्रकलनां संभावयति सत्तया ॥ १९ ॥
तत्राऽऽत्मनि तथा रन्ध्रान् प्रपश्यति तथोदितान् ॥ २० ॥
एभ्य एव समुत्पन्नं बहिःस्थं भूतपञ्चकम् ।
पश्यत्यनन्यदन्याभं शाखाशतमिवाऽङ्कुरः ॥ २१ ॥

श्रीरामजी, सत्य आत्माके सन्निधानसे अत्यन्त असद्रूप भी अविद्याकी जीव, पुर्यष्टक आदिरूप कल्पना की गई है, यह विचार भी अविद्यासे होता है ॥१६॥

श्रीरामभद्र, आप-जैसे अधिकारी जीवोंको उपदेश देनेके लिए उस अविद्याकी ही जीव आदिरूप कल्पना शास्त्रोंने की है। इसलिए प्रबोधके लिए एकचित्त होकर आप उसे सुनिए ॥ १७ ॥

जीवरूपताको प्राप्त हुई-सी, पुर्यष्टकरूप पदमें स्थित, अतएव मायारूपी कलङ्कसे वेष्टित तथा जीवको बाह्य विषयोंका दर्शन करानेके लिए उत्सुक यह चिति जिसकी जैसी भावना करती है, भलीभाँति उसका वैसा ही अनुभव कर लेती है ॥ १८ ॥

रात्रिमें बालक द्वारा कल्पित यक्ष की नाईं, फिर वह सत्य हो या असत्य ही हो, यह जीवचिति 'पञ्चतन्मात्राओंके पञ्चीकरणरूप शरीरकी कल्पना सत्य ही है' यों संभावना करती है ॥ १९ ॥

और उस देहरूप आत्मामें उसी प्रकार उत्पन्न यानी उपर्युक्त दृष्टान्तकी नाईं उत्पन्न इन्द्रिय द्वारोंको भी उस प्रकार देखती है ॥ २० ॥

इन्हीं पञ्चतन्मात्राओंसे उत्पन्न बाहर-स्थित पञ्चमहाभूतोंको, जो परमार्थतः उससे दूसरे नहीं हैं यानी चितिरूप ही हैं, इन्द्रियरूप द्वारोंसे उस प्रकार वह अन्य-सा देखती है, जिस प्रकार सैकड़ों शाखाओंको अङ्कुर ॥ २१ ॥

इदमन्तरिदं बाह्यमिति निश्चयवांस्ततः ।
जीवो भावं यथाऽऽदत्ते तत्तथा द्रढयत्यथ ॥ २२ ॥
रश्मिजालमिवेन्दोर्यदात्मनः प्रतिभासनम् ।
बाह्यस्पर्शतया तेन तदेवाऽऽशूरीकृतम् ॥ २३ ॥
मरिचस्येव यत्तैक्ष्ण्यं शून्यत्वमिव खस्य यत् ।
आत्मनो वेदनं यच्च तदेवाऽन्यदिव स्थितम् ॥ २४ ॥
अत्रैव निश्चयं बद्ध्वा नियमः सुदृढीकृतः ।
अनेनेत्थमनेनेत्थं भाव्यमित्यवखण्डितम् ॥ २५ ॥
स्वभावेतरनामाऽसौ स्वसङ्कल्पमयात्मकः ।
कश्चित् कदाचिद्भवति स्वभावेनैव नाऽन्यथा ॥ २६ ॥

तदनन्तर यह जीव, जिसे 'ये इन्द्रिय, मन, प्राण आदि आन्तर पदार्थ हैं और ये घट आदि बाह्य पदार्थ हैं' यों निश्चय हो चुका है, जिसकी जैसी वासना कर लेता है, उसे वैसी ही यानी उसी रूपसे दृढ कर लेता है ॥ २२ ॥

वहाँ विषय एवं इन्द्रिय के सन्निकर्षसे अभिव्यक्त स्वात्मसुखकी ही विषय-सुखके रूपसे वह कल्पना करता है, यह कहते हैं—'रश्मिजाल०' इत्यादिसे ।

चन्द्रमाकी किरणोंकी नाईं आत्माका जो सुखरूपसे ज्ञान होता है, उसे ही इस जीवने बाह्यविषयोंके सुखानुभवरूपसे शीघ्र स्वीकार कर लिया है ॥ २३ ॥

उसी प्रकार वह स्वाभाविक आत्म-वेदन ही विषयसन्निकर्षसे अभिव्यक्त अहमाकार आत्माका धर्म है, ऐसी भावना कर लेता है, यह कहते हैं—'मरिचस्येव' इत्यादिसे ।

मरिचसे अभिन्न मरिचकी प्रसिद्ध जो तीक्ष्णता है और आकाशसे अभिन्न आकाशकी प्रसिद्ध जो शून्यता है, इन दोनोंके सदृश आत्मासे अभिन्न प्रसिद्ध जो आत्माका ज्ञान है, वही अन्य-सा होकर स्थित है यानी स्वाभाविक आत्मज्ञान ही अज्ञानवश भिन्न-सा अहमाकार आत्माका धर्म बनकर स्थित है ॥ २४ ॥

सांसारिक विषयभोगोंमें ही पुरुषार्थकी परिसमाप्ति है, यह मत बाँधकर नश्वर सुखको लक्ष्यकर उसने 'इन लौकिक कर्मोंसे यह सुख होता है और इन पारलौकिक कर्मोंसे यह सुख होगा' इस नियमको सुदृढ कर दिया है ॥ २५ ॥

श्रीरामजी, [उन दोनों प्रवृत्तिनियमोंमें एक तो स्वाभाविक राग आदि

आत्मनैवेदमखिलं सम्पन्नं द्वैतमद्वयम् ।
खण्डो मधुरसेनेव मृदेव च महाघटः ॥ २७ ॥
सन्निवेशविकारादि देशकालादिसंभवात् ।
संभवत्यत्र न त्वीशे देशकालाद्यसंभवात् ॥ २८ ॥
इतः पुष्पमितः पत्रमहमित्युदितो यथा ।
खण्डे स्वात्मनि नः सत्तारसोऽद्वित्वे द्वितां वहन् ॥ २९ ॥

दोषोंसे जनित है और दूसरा शास्त्रजनित है । उक्त दोनों प्रकारोंके भी ये नियम सङ्कल्परूप हैं ।] उन दोनोंमें से कदाचित् कोई एक ही स्वाभाविक पुरुषप्रयत्नसे ही दूसरेको जीतकर होता है, अन्यथा नहीं, यह भाव है ॥ २६ ॥

उन दोनों स्थलोंमें भी स्वभाव या शास्त्र इन दोनोंमें से किसी एकका अनुसरण करनेवाले अज्ञ आत्माका ही तत्तत् व्यापारसाधनफलरूपसे विवर्त होता है, यह कहते हैं—'आत्मनैवेद०' इत्यादिसे ।

श्रीरामभद्र, द्वैत एवं अद्वैत रूप यह सम्पूर्ण जगत् उस प्रकार आत्मासे ही बना है, जिस प्रकार ईखके रससे खाँड़ और मिट्टीसे महाघट ॥ २७ ॥

यद्यपि खाँड़ और घट—ये दोनों अपने प्राक्तन द्रव और पिण्डावस्थाके विनाशसे विकारस्वरूप हैं; तथापि उनके माधुर्य और मिट्टीके स्वरूप का विनाश नहीं होता, अतः उतने अंशमें ही वे विवर्तके दृष्टान्त हैं । ब्रह्ममें तो उनकी तरह [किसी अंशमें भी] विकारका संभव नहीं है, क्योंकि वह उनका विधर्मी है, यह कहते हैं—'सन्निवेश०' इत्यादिसे ।

खाँड़, घट आदिमें—देश, काल आदिसे परिच्छिन्न होनेके कारण—अवयवविन्यास, विकार आदि हो सकते हैं; परन्तु ब्रह्ममें तो देशकृत, कालकृत आदि परिच्छेदोंके न होनेसे वे विकार आदि नहीं हो सकते ॥ २८ ॥

अथवा 'खण्डो मधुरसेनेव' इस वाक्यमें खण्डशब्द वनखण्डका वाचक है और 'मधुरसेनेव' का अर्थ 'वसन्तद्रवकी नाईं' ऐसा मानिए । एवञ्च वृक्ष-विकारका हेतुभूत जलभाग, जो कि अविकारीरूप ही है, दृष्टान्तरूपसे कहा गया है, इस आशयसे कहते हैं—'इतः' इत्यादिसे ।

जैसे वृक्षमें प्रविष्ट जल, 'यहाँ मैं पत्र हूँ', यहाँ 'मैं फूल हूँ' इत्यादि

इतः पट इतः कुड्यमहमित्यादितस्तथा ।
सर्वात्मनाऽऽत्मनि ब्रह्म विद्धि त्वं द्वित्वमाहरत् ॥ ३० ॥

अद्याङ्कुरोऽहमद्यार्करुगहं त्वद्य वारिदः ।
यथेति तिष्ठत्यम्भोदस्तथाऽऽत्मा सदसद्वपुः ॥ ३१ ॥

इति भाव्यमनेनेदमित्थं सर्वेश्वरे ततम् ।
क्रमं खण्डयितुं लोके कस्य नामाऽस्ति शक्तता ॥ ३२ ॥

आदर्शस्वच्छ आकाशे नैव स्वः प्रतिबिम्बति ।
व्यतिरेकासंभवतः कचत्येव हि केवलम् ॥ ३३ ॥

विचित्ररूपसे उदित होकर एक होनेपर भी अनेकताको धारण करता हुआ देखा गया है, वैसे ही हम लोगोंकी आत्मामें प्रसिद्ध सत्तावाले ब्रह्मने भी 'यहाँ मैं पट हूँ', 'यहाँ मैं कुड्य हूँ' इत्यादि भेदोंसे सम्पूर्ण जगदाकारसे आत्मामें द्वित्वको धारण कर लिया है, यह आप जानिए ॥ २९, ३० ॥

जैसे मेघ कालभेदसे—पहले ग्रीष्म-ऋतुमें 'मैं सूर्यतापरूप हूँ' यों अभेद-भावना कर सूर्यतापरूपसे, फिर वर्षाऋतुके प्रारम्भमें वृष्टि करनेके समय 'मैं जल बरसानेवाला हूँ' यों जलप्रदरूपसे और फिर पृथ्वीमें प्रवेश द्वारा अङ्कुरके अन्दर जलरूपसे उसका प्रवेश होनेपर 'मैं अङ्कुररूप हूँ' यों अङ्कुररूपसे—स्थित रहता है; वैसे ही यह आत्मा भी कालभेदसे भाव और अभाव का आकार होकर स्थित रहता है ॥ ३१ ॥

जगद्रूप विवर्तका नियम-क्रम यद्यपि कल्पित ही है; फिर भी कोई उसे अन्यथा नहीं कर सकता, यह कहते हैं—'इति' इत्यादिसे ।

इस वस्तुसे यह कार्य इस प्रकार होवे [—जैसे अग्निसे उष्णता और जलसे शैत्य], यों परब्रह्ममें कल्पित प्रसिद्ध क्रमको इस जगत्में ऐसा कौन जीव है, जो तोड़ सकता हो अर्थात् कोई तोड़ नहीं सकता ॥ ३२ ॥

इसी प्रकार वस्तुस्वभावका नियम भी वस्तुभेदसे भिन्न ही है और न उसे कोई अन्यथा ही कर सकता है, इस आशयसे आकाशादिके स्वभावका और अज्ञात ब्रह्मके स्वभावका परस्पर वैलक्षण्य बतलाते हैं—'आदर्शस्वच्छ' इत्यादि दो श्लोकोंसे ।

ब्रह्मणि त्वात्मनाऽऽत्मैव स्थितः कचति बिम्बति।
द्वैतीभवत्यदेहोऽपि चिन्मयत्वात् स्वभावतः ॥ ३४ ॥
यद्यथैवाऽऽत्मकचनं वेत्ति तं भवताऽऽत्मना।
असत्यमपि तन्नेह व्यभिचारी कदाचन ॥ ३५ ॥
हेमत्वकटकत्वे द्वे सत्यासत्यस्वरूपिणी।
हेम्नि भाण्डगते यद्वच्चित्त्वाचित्त्वे तथाऽऽत्मनि ॥ ३६ ॥

दर्पणकी नाईं स्वच्छ आकाशमें अपना भाग (आकाश-भाग) या अपना कार्य प्रतिबिम्बित नहीं ही होता, क्योंकि आकाशमें या उसके कार्यभूत अन्य भूतोंमें आकाशका भेद नहीं रहता (भिन्न वस्तुमें प्रतिबिम्ब पड़ता है—इस सिद्धान्तके अभिप्रायसे यह कहा गया है), किन्तु केवल आकाश प्रतिबिम्बशून्य दर्पणके मध्यके समान निर्मलरूपसे शोभित होता है। [अविद्यासे समन्वित ब्रह्म तो वैसा नहीं है, यह कहते हैं—'ब्रह्मणि' से] और अविद्या-संवलित ब्रह्ममें तो अपने स्वरूपसे स्थित आत्मा ही समस्तवस्तुशक्ति आदि रूपसे शोभित होता है, जीवरूपसे प्रतिबिम्बित होता है और चूँकि वह स्वभावतः चिन्मय है, इसलिए देहरहित होता हुआ भी वह भेदबुद्धिसे द्वितीय-सा होता है ॥ ३३, ३४ ॥

ऐसा भले ही मान लिया जाय, परन्तु उससे प्रकृतमें क्या आया ? इसपर कहते हैं—'यद्यथैवा०' इत्यादिसे।

सर्गके आदिमें जिस वस्तुस्वभावसे आत्मकचन (आत्माका प्रकाश) हुआ, असत्य भी उस स्वभावको सत्य आत्मा द्वारा सत्यरूपसे जानता है। और वह नियम कभी भी व्यभिचरित नहीं होता, अतः सभी प्रकारके नियम सिद्ध हो जाते हैं, यह भाव है ॥ ३५ ॥

सत्य और अनृत के मिथुनीभावसे 'वाचारम्भण' श्रुतिमें दर्शित न्यायसे दृष्टान्त बतलाते हैं—'हेमत्व०' इत्यादिसे।

जिस प्रकार भूषणमें स्थित सुवर्णमें यानी सुवर्णके आभूषणमें सत्य एवं असत्यरूप सुवर्णत्व और कटकत्व दोनों रहते हैं, उसी प्रकार आत्मामें भी चित्त्व और अचित्त्व दोनों रहते हैं ॥ ३६ ॥

सर्वगत्वाच्चितेश्चित्त्वं नित्यं मनसि विद्यते ।
हेमत्वं कटकस्येव जडभावः स्थितोऽन्यदा ॥ ३७ ॥
चित्त्वजाड्यात्मकं चित्तं दृढं भावयति स्वयम् ।
यथा यदैव यद्भावं तथा भवति तत्तदा ॥ ३८ ॥
काले काले चिता जीवस्त्वन्योऽन्यो भवति स्वयम् ।
भाविताकारवानन्तर्वासनाकलिकोदयात् ॥ ३९ ॥
स्वप्ने दृष्टो यथा ग्रामो याति सत्ताऽन्यतेक्षणात् ।
देहाद्देहं तथा याति देहोऽयं प्रतिभात्मकः ॥ ४० ॥

इसीलिए उसके प्रथम कार्यभूत मनमें चिद्रूपता तथा जड़ता—ये दोनों दिखाई पड़ती हैं। उनमें जो नित्य है, वही सत्य है, यह कहते हैं—'सर्वगत्वात्' इत्यादिसे ।

जिस प्रकार कटकमें नित्य ही सुवर्णरूपता रहती है, उसी प्रकार चितिके सर्वव्यापी होनेसे उसके सर्वप्रथम कार्य मनमें सर्वदा चितिरूपता रहती है। और जडरूपता तो किसी समय यानी अध्याससमयमें विद्यमान रहती है ॥ ३७ ॥

चेतन और जड स्वरूप * यह चित्त स्वयं जभी जिस किसी पदार्थकी जिस प्रकार दृढ़ भावना करता है, यानी जभी देव, नर, स्थावर आदिरूपसे देवादिके स्वरूपकी भावना करता है, तभी उस प्रकारका वह हो जाता है ॥ ३८ ॥

अतएव कालभेदसे जीवमें अहमाकारभेदका अनुभव होता है, यह कहते हैं—'काले' इत्यादिसे ।

चैतन्यसे भीतर वासनारूपी कलियोंका विकास होता है; उसीसे यह जीव विचित्र तरहसे भावित आकारवाला होकर समय-समय पर स्वयं भिन्न-भिन्न रूपका हो जाता है ॥ ३९ ॥

जैसे स्वप्नमें दिखाई पड़ा ग्राम वनादिसत्तारूपी भिन्नताके अवलोकनसे वनादिभावको प्राप्त हो जाता है, वैसे ही देहभूत यह जीव भी एक देहसे दूसरी देहको प्राप्त हो जाता है, क्योंकि यह स्वप्नके समान ही प्रतिभासात्मक है ॥ ४० ॥

---

* कहीं-कहीं 'चित्तजाड्यात्मकम्' ऐसा भी पाठ मिलता है। उसके अनुसार 'चित्तका जाड्य यानी जडदेहविषयाकार, तत्स्वरूप' यह अर्थ समझना चाहिए ।

प्रतिभासो यथा स्वप्ने नरः कुड्यं पटो भवेत् ।
भवत्यसत्यमेवेदं देहान्तरमिदं स्वतः ॥ ४१ ॥
असत्यमेव म्रियते त्वसत्यं जायते पुनः ।
जीवः स्वप्रतिभासेन स्वप्नवत् स्वान्यरूपवत् ॥ ४२ ॥
कालेनैतादृशं रूपमिदं नाऽन्यत्वमेति वै ।
प्रकृतं निश्चयारूढं भ्रमन्त्येते भवः स्वतः ॥ ४३ ॥
वस्तु दृष्टमदृष्टं च स्वप्ने समनुभूयते ।
जीवस्वप्ने जगद्रूपं विद्धि वेद्यविदां वर ॥ ४४ ॥

जैसे स्वप्नमें दिखाई दे रहा मनुष्य शीघ्र ही भित्ति बनकर पट बन जाता है, वैसे ही मरण-मूर्च्छामें भी प्रतिभासमान असत्यरूप ही यही शरीर यह दूसरा शरीर अपने-आप बन जाता है ॥ ४१ ॥

यदि कोई यह शङ्का करे कि देह तो प्रत्यक्ष ही मरती और भस्मीभूत हो जाती है, भला वह फिर दूसरी देह कैसे बन जायगी ? तो इसपर कहते हैं— 'असत्यमेव' इत्यादिसे ।

स्वप्नमें अपने प्रतिभाससे अपनी दूसरी देहकी तरह यह जीव असत्य ही मरता है और फिर असत्य ही उत्पन्न होता है । तात्पर्य यह है कि मरनेवालेका मरण और जन्म भी प्रातिभासिक ही है । जी रहे लोगोंको तो अपनी अविद्यासे कल्पित ही उसकी देहके दाह आदिका दर्शन होता है न कि उसकी वासनामय देहका ॥४२॥

तब क्या युवावस्था और वृद्धावस्था की नाईं देहान्तर-प्राप्ति भी इस देहका कालिक परिणाम ही है ? इस शङ्कापर 'नहीं' ऐसा कहते हैं—'कालेन' इत्यादिसे ।

देहका यह वर्तमान स्वरूप समय पाकर युवावस्थाके सदृश देहान्तर-रूप हो जाता है—ऐसी बात नहीं है, क्योंकि वर्तमान शरीर बाल्य, यौवन आदि अवस्थाओंके भिन्न होनेपर भी 'वह यही शरीर है' इस प्रत्यभिज्ञात्मक निश्चयका विषय होता है । परन्तु ये भूत एवं भविष्यत् शरीर तो वैसी प्रत्यभिज्ञाके विषय नहीं हैं, उक्त प्रत्यभिज्ञाके न होनेसे दूसरों द्वारा 'कालतः अन्य हैं और वस्तुतः अन्य नहीं हैं' इत्यादि भ्रान्तिको प्राप्त होते हैं । अतः उनकी जीवसे ही उत्पत्ति है यानी वासनासे ही उनका उद्भव है ॥ ४३ ॥

यदि शङ्का हो कि जिन्हें पहले कभी देखा ही नहीं, उन देवादिशरीरोंमें इस जीवकी वासना ही कैसी ? तो इसपर कहते हैं—'वस्तु' इत्यादिसे ।

अजाग्रद्दृष्टिदृष्टो यः स्वाभिधानादिनेरितः ।
न स्वप्नो विद्यते तस्मादच्छात्मा चितिमात्रकम् ॥ ४५ ॥
अद्याऽपूर्वाभिधं स्वप्ने यथा पश्यति नाऽन्यथा ।
अग्रदृष्टं तथैवाऽर्थं चेतनं चित् प्रपश्यति ॥ ४६ ॥
प्राक्तनी वासनाऽद्याऽपि पौरुषेणाऽवजीयते ।
ह्यः कुकर्माऽद्य यत्नेन प्रयाति हि सुकर्मताम् ॥ ४७ ॥

हे तत्त्वज्ञोंमें श्रेष्ठ श्रीरामभद्र, ['तस्य त्रय आवसथास्त्रयः स्वप्नाः'* इस श्रुतिके अनुसार] यह जगद्रूप तो जीवस्वप्नके अन्तर्गत ही है यानी जीवका एक स्वप्न ही है, यह आप जानिए। [और चूँकि] स्वप्नमें इस जन्ममें दृष्ट एवं अदृष्ट वस्तुओंका अनुभव होता है, [इसलिए पूर्वमें अदृष्ट देवादिशरीरोंकी वासना होनेमें किसी प्रकारकी आपत्ति नहीं है †] ॥ ४४ ॥

तब महावाक्योंसे जनित ब्रह्मसाक्षात्कारसे प्राप्य ब्रह्मभाव भी देहान्तरकी नाईं वासनामय स्वप्न ही क्यों नहीं है? इसपर कहते हैं—'अजाग्र०' इत्यादिसे।

जो 'शिवमद्वैतं चतुर्थं मन्यन्ते' इस श्रुतिमें उक्त शिवादि स्वनाम आदिसे कथित है और तुरीयदृष्टिसे दृष्ट है, उस परमात्माको उक्त तीनों लक्षणोंवाला स्वप्न ही नहीं हो सकता। जाग्रत्कालमें कभी भी उसका अनुभव न होनेसे उसकी वासना ही अप्रसिद्ध है, अतः वह वासनामय नहीं हो सकता। इसलिए यह निर्मलात्मा एकमात्र चिति ही है ॥ ४५ ॥

वही चिदात्मा जीव होकर आज अभिनव वर्तमान विषयको जिस प्रकार चित्स्वभाव होनेसे ही देखता है, जड़स्वभाव होनेसे नहीं, उसी प्रकार आगे देखे जानेवाले विषयोंको भी देखता है ॥ ४६ ॥

इसीलिए अदृष्ट विषयमें भी भावनाओंके उपचयसे दृढ हुई वासना पूर्वमें दृष्ट विषयोंकी वासनाओंपर विजय पाती है. यों पुरुषप्रयत्नकी प्रबलता दिखलाई गई है, यह कहते हैं—'प्राक्तनी' इत्यादिसे।

---

* उस स्रष्टा ईश्वरकी पितृशरीर, मातृगर्भाशय और अपना शरीर ये तीन अवस्थाएँ एवं जाग्रत्, स्वप्न तथा सुषुप्ति नामक तीन स्वप्न हैं।

† वस्तुतः अनादि संसारमें अननुभूत कुछ भी नहीं है, अतः मरणकालमें भाविदेहके आरम्भक कर्मोंसे उद्बुद्ध हुई वासनाके अनुसार देहान्तरकी उत्पत्ति हो सकती है।

मोक्षादृते न शाम्यन्ति जीवतां चक्षुरादयः ।
उन्मज्जन्ति निमज्जन्ति केवलं देशकालतः ॥ ४८ ॥
चितः स्वकलनाचस्य देहोऽग्र इव तिष्ठति ।
पञ्चात्मा भावितोऽसत्यो महायक्षः शिशोरिव ॥ ४९ ॥
मनोबुद्धिरहङ्कारस्तथा तन्मात्रपञ्चकम् ।
इति पुर्यष्टकं प्रोक्तं देहोऽसावातिवाहिकः ॥ ५० ॥

जैसे कलके किये गये कुकर्म यानी अनुचित कर्म आजके प्रयत्नसे सुकर्मताको प्राप्त होते हैं, वैसे ही आज भी पुरुषप्रयत्नसे पहली वासनापर विजय प्राप्त की जा सकती है ॥ ४७ ॥

इस प्रकार अबतक जीवके वासनापरिणामस्वरूप देहादिबन्धका वर्णन किया गया, अब उसकी शान्ति कब होगी ? इस जिज्ञासापर कहते हैं—'मोक्षा०' इत्यादिसे ।

प्राणियोंकी चक्षु आदि इन्द्रियाँ बिना मोक्षके शान्त नहीं होतीं, वे देशकृत और कालकृत भेदोंसे इस संसारसागरमें उतराती और डूबती रहती हैं ॥ ४८ ॥

बिना मोक्षके देहादिकी निवृत्ति क्यों नहीं होती ? इस शङ्कापर कहते हैं—'चितः' इत्यादिसे ।

चूँकि जबतक मोक्ष नहीं हो जाता तबतक इस चितिकी अपनी देहाकारकी कल्पना करनेवाली वासना सदा बनी ही रहती है, इसलिए इस जीवकी अपनी वासना ही पाञ्चभौतिक देह होकर उस प्रकार आगे खड़ी हुई-सी रहती है; जिस प्रकार बालकके आगे कल्पित असत्य महायक्ष खड़ा हुआ-सा रहता है, [अतः मोक्षके बिना देहादिकी निवृत्ति नहीं हो सकती] ॥ ४९ ॥

अब, कथञ्चित् पाञ्चभौतिक स्थूलशरीरकी निवृत्ति होनेपर भी मोक्षके बिना लिङ्गदेहात्मक पुर्यष्टककी निवृत्ति नहीं ही हो सकती, इस आशयसे उसे दिखलाते हैं—'मनोबुद्धि०' इत्यादिसे ।

मन, बुद्धि, अहङ्कार एवं पाँच सूक्ष्मतन्मात्राएँ—इन आठोंका समूह पुर्यष्टक कहा गया है । और यही 'आतिवाहिक' देह कही गई है ॥ ५० ॥

अमूर्त एव चित्तात्मा खत्वमस्याऽतिपीनता ।
वातताऽस्य महागुल्मो देहताऽस्य सुमेरुता ॥ ५१ ॥
विरजस्त्वक्रमेणैव निरवस्थस्तु मुक्तिभाक् ।
सुषुप्तैकावस्थाऽस्य जडाः क्रोडीकृता यया ॥ ५२ ॥
स्वप्ननाम्नी तथाऽवस्था देहप्रत्ययशालिनी ।
आमोक्षं भ्रमतीहाऽयमिति स्थावरजङ्गमैः ॥ ५३ ॥

यदि शङ्का हो कि शास्त्रोंमें ज्ञानेन्द्रिय, कर्मेन्द्रिय, प्राण, पञ्चमहाभूत, अन्तःकरण, अविद्या, काम और कर्म—इन्हें पुर्यष्टक कहा गया है, वह पञ्चीकृत आकाश, वायु आदि लिङ्गघटित स्थूलान्त मूर्तरूप भी होगा। ऐसी स्थितिमें आपने अमूर्त मन, बुद्धि आदि आठोंका समूह ही 'पुर्यष्टक' है, यह कैसे कहा ? तो इसपर कहते हैं—'अमूर्त' इत्यादिसे ।

आप द्वारा कथित मूर्तरूप पुर्यष्टक तब होगा जब पञ्चीकरणसे अमूर्तरूप तन्मात्राओंकी स्थूलता होगी। यह सूक्ष्मतन्मात्रस्वरूप लिङ्गात्मा तो अमूर्त ही है। इसकी पञ्चीकृत आकाशरूपता, जो कि निरवधि स्थूल है, नहीं हो सकती, करोड़ों अमूर्त वासनाओंको मिलानेपर भी कहीं स्थूलता नहीं दिखाई पड़ती। जब इस पुर्यष्टककी आकाशरूपता ही दुर्लभ है तब उसकी स्थूल वायुरूपता बड़ी-बड़ी तनोंवाले वृक्षकी नाईं अत्यन्त ही असंभावित है। इसी प्रकार स्थूल तेज, जल एवं पृथिवी रूपता भी असंभावित है। एवञ्च, जब स्थूल-भूतोंका ही उसमें (पुर्यष्टकमें) संभव नहीं है तब इसकी देहता उस प्रकार अत्यन्त असंभावित है, जिस प्रकार अतिसूक्ष्म परमाणुकी सुमेरुता। अतः यह नहीं कह सकते कि भौतिक देहतक ही पुर्यष्टक है, यह भाव है ॥ ५१ ॥

मुक्तिमें अनुपयोगी होनेसे भी इस मोक्षशास्त्रमें स्थूल पदार्थोंके अस्तित्वकी कल्पना युक्त नहीं है, इस आशयसे कहते हैं—'विरज०' इत्यादिसे ।

यदि यह देहादिप्रपञ्च मनोमात्र ही है यानी एक कल्पना ही है तो वैराग्य आदिके अभ्याससे—उसे (मनको) राग-द्वेषशून्य कर देनेपर यह जीव शमादि-साधनचतुष्टयसे सम्पन्न हो जाता है। तदनन्तर महावाक्यों द्वारा ज्ञानोदय-क्रमसे मनःकल्पित स्वप्नप्राय प्रपञ्च और उसकी मूलभूत अविद्या का बाध हो जानेपर—अपनी कार्य एवं कारण स्वरूप अवस्थात्मक दोनों बन्धोंसे शून्य जीवको

कदाचिद्धि सुषुप्तस्थः कदाचित् स्वप्नवत् स्थितः ।
आतिवाहिकदेहोऽयं सर्वस्यैवाऽवतिष्ठते ॥ ५४ ॥
यदा सुषुप्तभावस्थो भाविदुःस्वप्नवेधितः ।
तदा कालानलसमस्तिष्ठत्यनुदिताकृतिः ॥ ५५ ॥
स्थावराद्यास्ववस्थासु कल्पवृक्षदशासु च ।
भवत्येव सुषुप्तस्थो घनमोहशिलाघनः ॥ ५६ ॥

मुक्ति प्राप्त होती है । स्थूलभूत भौतिक मूर्तप्रपञ्चकी भी सत्ता माननेपर तो उस प्रकारके प्रपञ्चका ज्ञानसे बाध दिखाई न पड़नेपर मुक्ति हो नहीं सकती । [एवञ्च, निष्कर्ष यही निकला कि स्वप्न और सुषुप्ति—ये दो ही अवस्थाएँ हैं, जाग्रत्नामक स्थूलविषयिणी दूसरी अन्य कोई अवस्था किसीसे सिद्ध नहीं की जा सकती, इस आशयसे उन्हीं दोनोंका विभागकर दिखलाते हैं—'सुषुप्ततैका०' इन डेढ़ श्लोकोंसे ।] जिसने जड़स्वरूप देहादि सब प्रपञ्चको वासनारूपसे उपसंहारकर गोदमें कर लिया है, वह जीवकी सुषुप्तता यानी सुषुप्तिनामक एक अवस्था है, और देहप्रतीतिसे समन्वित स्वप्ननामकी दूसरी अवस्था है । इस तरह दिखाई दे रहे प्रकारोंसे स्थावर एवं जङ्गम आकारोंसे यह आतिवाहिक देह ही मोक्ष-प्राप्तिपर्यन्त इस संसारमें घूमती रहती है ॥ ५२, ५३ ॥

श्रीरामजी, सबकी ही यह आतिवाहिक देह कभी तो सुषुप्तावस्थामें स्थित रहती है और कभी स्वप्नकी नाईं यानी स्वप्नावस्थामें स्थित रहती है ॥ ५४ ॥

सुषुप्तावस्थामें स्थित यह आतिवाहिक देह जब वासनारूपसे भीतर प्रविष्ट हुए भविष्यत् दुःस्वप्नोंसे विद्ध-सी होकर स्मृतिशून्य और अनुदित आकारवाली हो जाती है, तब चितिके प्रतिबिम्बसे खचित होनेसे तथा अपनेमें सम्पूर्ण जगत्का उपसंहार कर लेनेसे वह प्रलयकालीन अग्निके समान प्रदीप्त होकर स्थित रहती है ॥ ५५ ॥

उन स्थावर आदि निकृष्ट योनियोंमें जड़ताके आधिक्यसे सुषुप्तिकी प्रचुरता है, यह कहते हैं—'स्थावराद्या०' इत्यादिसे ।

स्थावर आदि अवस्थाओंमें तथा कल्पवृक्षकी अवस्थाओंमें भी *

*प्रस्तुत श्लोकमें 'च' शब्द अप्यर्थक है यानी उसका 'भी' यह अर्थ है । एवञ्च, कल्पवृक्षोंमें पुण्यके आधिक्यसे कृमि, कीट क्षुधा, तृषा आदि दुःखोंके न होनेसे यद्यपि आनन्द अधिक है; तथापि उनमें मनुष्य आदिके समान ज्ञान नहीं है, किन्तु अत्यन्त तमोमयता ही है, यह भाव है ।

सुषुप्तताऽस्य जडता स्वप्नोत्थेयं हि संसृतिः ।
यः प्रबोधोऽस्य सा मुक्तिस्तज्जाग्रद्या तु तुर्यता ॥ ५७ ॥
जीवप्रबोधान्मुक्तिर्हि प्रबोधात् परमात्मताम् ।
सोऽभ्येति क्षालितमलं ताम्रं कनकतामिव ॥ ५८ ॥
जीवप्रबोधान्मुक्तिर्या सा चेह द्विविधोच्यते ।
एका जीवन्मुक्ततेति द्वितीया देहमुक्तता ॥ ५९ ॥
जीवन्मुक्तिर्हि तुर्यत्वं तुर्यातीतं पदं ततः ।
बोधो जीवः प्रबोधोऽयं स च बुद्धिप्रयत्नतः ॥ ६० ॥
ज्ञातप्रमाणो जीवोऽन्तर्यो जानातीह तन्मयः ।
पश्यतीमं भयं चैव सुदीर्घस्वप्नविभ्रमम् ।
मिथ्योदितः स्वहृदये स्वस्थ एव शिलीकृते ॥ ६१ ॥

पाषाण-शिलाके समान घनीभूत जड़तावाली (तमोयुक्त) यह आतिवाहिक देह सुषुप्ति-अवस्थामें ही स्थित रहती है ॥ ५६ ॥

एवञ्च, इस देहकी चित्तकी अधिक जड़ता ही सुषुप्ति है, चित्तका भ्रमण ही संसार है, चित्तका तत्त्वज्ञान ही बन्धसे मुक्ति है, तुर्यता ही इसकी जाग्रदवस्था है, यही सिद्ध हुआ, यह कहते हैं—'सुषुप्तताऽस्य' इत्यादिसे ।

श्रीरामभद्र, इस देह की सुषुप्तावस्थामें स्थिति जड़ता है, स्वप्नावस्थासे ही उत्पन्न यह संसार है, इसका जो तत्त्वज्ञान है, वह मुक्ति है । और जो जाग्रदवस्था है, वही तुर्यरूपता है ॥ ५७ ॥

जीवके तत्त्वज्ञानसे ही मुक्ति होती है और उसी तत्त्वज्ञानसे वह वैसे परमात्मस्वरूपताको प्राप्त हो जाता है, जैसे मल धो दिये जानेपर विशुद्ध हुआ ताँबा सुवर्णरूपताको प्राप्त हो जाता है ॥ ५८ ॥

श्रीरामभद्र, जीवके तत्त्वज्ञानसे जो मुक्ति प्राप्त होती है, वह शास्त्रोंमें दो प्रकारकी बतलायी गई है—एक जीवन्मुक्ति और दूसरी देहपातसे होनेवाली कैवल्यमुक्ति ॥ ५९ ॥

जीवन्मुक्ति ही तुरीयावस्था है । उसके परे तुरीयातीत ब्रह्मपद है । तत्त्वज्ञान होनेसे यह जीव प्रबोधस्वरूप हो जाता है यानी उत्कृष्ट चैतन्यात्मक ब्रह्मरूप हो जाता है और वह तत्त्वज्ञान या बोध पुरुष प्रयत्नसे साध्य है ॥ ६० ॥

इस व्यवहार-भूमिमें जो जीव 'परमार्थतः मेरा यह परिमाण है और यह

जीवानामन्तरे त्वन्यन्न किञ्चिच्चित्कलां विना ।
तामेवाऽन्यतया पश्यन् मुधैव परिशोचति ॥ ६२ ॥
जीवाणोरन्तरे त्वन्यन्न किञ्चित्परमाहते ।
यत्र तत्र जगद्दृष्टमहो मायाविजृम्भितम् ॥ ६३ ॥
स्थाल्यन्तःक्वथदम्बूनां यथा नाना भ्रमोदयः ।
जीवाणूनां तथैवाऽन्तर्मिथ्यासंसरणोदयः ॥ ६४ ॥
बन्धोऽस्य वासनाबन्धो मोक्षः स्याद्वासनालयः ।
वासनान्तन्तोऽस्य सौषुप्ती स्वप्ने विस्फुरति स्थितिः ॥ ६५ ॥
घनवासनमोहोऽयं जीवः स्थावरतादिभाक् ।
मध्यस्थवासनस्तिर्यक् पुरुषस्तनुवासनः ॥ ६६ ॥

मेरा स्वरूप है' यों ज्ञान कर लेता है, वह सबके भीतर स्थित साक्षिभूत चिदात्ममय ही हो जाता है। और जो जीव उपर्युक्त ज्ञानसे शून्य है, परमार्थतः उसके ब्रह्मनिष्ठ होनेपर भी अज्ञानवश वह शिलाकी नाईं दृढीकृत अपने हृदयमें दीर्घतम संसारस्वप्न-भ्रान्तिरूप तीव्र भयको देखता रहता है ॥ ६१ ॥

तब क्या जीवके हृदयमें वास्तविक भय है? इस शङ्कापर 'नहीं' ऐसा कहते हैं—'जीवाना०' इत्यादिसे ।

जीवके भीतर चितिकलाके सिवा और दूसरा कुछ भी नहीं है, यह उसे ही अन्यरूपसे देखता हुआ व्यर्थमें सोच किया करता है ॥ ६२ ॥

जीवरूप परमाणुके भीतर तो परममहत् ब्रह्मके सिवा दूसरा कुछ भी नहीं है, अहो! जहाँ-तहाँ यह जो जगत् आँखोंके सामने आ पड़ा है, वह मायाका ही विलास है ॥ ६३ ॥

जिस प्रकार बटलोईके भीतर खौल रहे जलमें नानात्वका भ्रम उत्पन्न होता है, उसी प्रकार जीवरूप परमाणुके भीतर मिथ्या ही संसार उत्पन्न होता है ॥ ६४ ॥

श्रीरामजी, वासनाओंका बन्ध ही इस जीवाणुका बन्ध है, वासनाओंका नाश ही इसका मोक्ष है और वासनाओंका अन्त यानी अवधि ही इसकी सुषुप्ति-अवस्था है, [क्योंकि तुर्य और तुर्यातीत ये दोनों पद वासनाशून्य होते हैं ।] और वह स्वप्नमें चित्र-विचित्र रूपसे स्फुरित होती है ॥ ६५ ॥

किस प्रकार स्फुरित होती है? यह कहते हैं—'घनवासन०' इत्यादिसे ।

यदाऽन्तर्जीवितेनाऽन्तो बहिर्जाता घटादयः ।
जीवैक्यादुभयोः सत्ता ग्राह्यग्राहकयोस्तदा ॥ ६७ ॥
आत्माऽनात्मसमालीढो बहिरन्तर्यदा चिता ।
तदा ग्राह्यग्रहणधीर्मृगतृष्णेव सोदया ॥ ६८ ॥
नेह संत्यज्यते किञ्चिन्नेह किञ्चिन्न गृह्यते ।
बाह्यान्तरकलाकारश्चिदात्मैकः प्रकाशते ॥ ६९ ॥

जब यह जीव घनीभूत वासनाओंके मोहसे युक्त होता है तब वह स्थावर आदि योनियोंका भागी होता है यानी स्थावर आदि योनियोंमें प्राप्त-सा दिखलाई पड़ता है, जब मध्यम प्रकारकी वासनाओंसे युक्त होता है तब पशु, पक्षी आदि योनियोंका भागी होता है और जब तनुवासनाओंसे समन्वित होता है तब मनुष्य, देव, गन्धर्व आदि योनियोंमें प्राप्त होता है। तात्पर्य यह है कि वासनाओंके क्षयके तारतम्यसे उत्तरोत्तर शुभयोनिकी प्राप्ति होती है ॥ ६६ ॥

वासनाओंके क्षयतारतम्यसे वैचित्र्यकी अभिव्यक्ति बतलानेके पश्चात् ग्राह्य, ग्रहण आदिके वैचित्र्यसे भी वैचित्र्याभिव्यक्ति बतलाते हैं—'यदा०' इत्यादिसे ।

सुषुप्तिकी विच्युतिके समय जब देहके भीतर नखके अग्रभागसे लेकर व्याप्त प्राणोंमें अहम्भावसे 'देहपरिमाणवाला ही मैं हूँ' यों जब परिच्छेद होता है तब घट आदि पदार्थ बाहर उत्पन्न हो जाते हैं। [वे बाहर होवे, उससे क्या ? इसपर कहते हैं—'जीवैक्या०' से।] वैसी स्थितिमें चक्षु आदि द्वारोंसे निकले हुए अन्तःकरण द्वारा बाहर निकला हुआ अन्तःकरण-वृत्त्यवच्छिन्न चैतन्यात्मा जीव बाह्य घटादि विषयोंके साथ व्याप्ति करता है। पश्चात् 'मैं घटको जानता हूँ' यों ग्राह्य एवं ग्राहक की वासनात्मिका सत्ता तत्तत् वैचित्र्यसे स्पष्टतः अभिव्यक्त हो जाती है ॥ ६७ ॥

उसीका स्पष्टीकरण करते हैं—'आत्मा०' इत्यादिसे ।

अन्दर रहनेवाला जीव बाहर अनात्मपदार्थों पर जब आरूढ़ हो जाता है, तब ग्राह्यग्राहकवासना, मृगतृष्णाकी नाईं, अध्यस्तविभागसे प्रकट हो जाती है ॥ ६८ ॥

इसी प्रकार हेय-उपादेयकी विचित्रता भी वासनाध्यस्त ही है, वास्तविक नहीं, ऐसा कहते हैं—'नेह' इत्यादिसे ।

त्रिजगच्चिच्चमत्कारस्त्वलं भेदविकल्पनैः ।
शोभिताः स्मश्चिति चिरात् सबाह्याद्यं न विद्यते ।। ७० ।।

अब्धिर्यथा जलमपास्तसमस्तभेदः
खादच्छमेव सकलं द्रवमेकशुद्धम् ।
सर्वं तथेदमपहस्तितभेदजात-
माद्यं परं पदमनामयमेव बुद्धम् ।। ७१ ।।

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मोक्षोपाये निर्वाणप्रकरणे
इन्द्रियार्थोपलम्भविचारो नामैकपञ्चाशः सर्गः ।। ५१ ।।

आत्मा यहाँ न किसीका त्याग करता है और न किसीका ग्रहण ही करता है। वास्तवमें आत्मासे भिन्न किसीका अस्तित्व है ही नहीं। अतः यहाँ बाह्य और आन्तर कलाओंके आकारवाला एकमात्र चिदात्मा ही प्रकाशता है ।।६९।।

ये तीनों जगत् चैतन्यात्माकी एक चमत्कृति ही है। इसलिए भेदक सङ्कल्पोंसे प्रयोजन ही क्या रहा ? । अब हम तत्त्वज्ञानसे अपने चैतन्यस्वरूपमें चिरकालसे विराजमान हैं। यह बाह्य-आन्तर जगत् कालत्रयमें भी नहीं है ।। ७० ।।

तत्त्वतः विचारा गया समुद्र जैसे तरङ्ग आदि समस्त विभेदोंसे शून्य हुआ—आकाशसे भी स्वच्छ—सम्पूर्णरूपसे केवल विशुद्ध द्रवात्मक जलस्वरूप ही है, वैसे ही यह जगत् भी तत्त्वतः ज्ञात हुआ वासनाकालीन समस्त विभेदोंसे शून्य विकारवर्जित केवल परमपद ब्रह्मस्वरूप ही है ।। ७१ ।।

इक्यावनवाँ सर्ग समाप्त

द्विपञ्चाशः सर्गः

वसिष्ठ उवाच

यो जीवस्याऽऽदितः स्वप्नो नानाकलनकोमलः ।
तमिमं विद्धि संसारं न सत्यं नाऽप्यसन्मयम् ॥ १ ॥
न पुंस इव जीवस्य स्वप्नः संभवति क्वचित् ।
तेनैते जाग्रतो भावा जाग्रत्स्वप्नकृतोऽत्र हि ॥ २ ॥
जीवस्वप्नमिमं दीर्घं क्षिप्रताप्रतिभासतः ।
असत्यमप्यवस्तुत्वाद्विद्धि वेद्यविदां वर ॥ ३ ॥

बावनवाँ सर्ग

[आदिजीव हिरण्यगर्भका स्वप्न ही जगत् है, उसमें अनासक्तिसे उसका विनाश हो जाता है—इस अर्थका दृढीकरण करनेके लिए महाराज वसिष्ठजी द्वारा अर्जुनाख्यानका उपक्रम]

सभी जीवोंमें प्रत्येकका स्वप्न अलग-अलग होता है, परन्तु जाग्रत्-प्रपञ्च तो सबके लिए एक-सा ही है और स्वप्नके-वैधर्म्यसे सभी उसका अनुभव भी करते हैं। ऐसी स्थितिमें भला वह स्वप्नरूप कैसे हो सकता है ? इसपर कहते हैं—**'यो जीवस्या०'** इत्यादिसे।

महाराज वसिष्ठजीने कहा—श्रीरामचन्द्रजी, सम्पूर्ण जीवसमष्टिस्वरूप हिरण्यगर्भका अनेकविध कल्पनाओंसे कोमल (रमणीय) जो प्रथम स्वप्न है, वही हम लोगोंका 'जाग्रत् संसार' है, यह आप जानिए। वह संसार न सत्यरूप है और न असत्यरूप ही है ॥ १ ॥

किसलिए ऐसी कल्पना करते हैं ? यदि यह पूछिए तो इसका उत्तर यही है कि व्यष्टि-जीवकी तरह समष्टि-जीवका (हिरण्यगर्भका) कोई दूसरा स्वप्न प्रसिद्ध ही नहीं है इसलिए, यही कहते हैं—**'न पुंसः'** इत्यादिसे।

चूँकि व्यष्टि-जीवोंके समान आदिपुरुष हिरण्यगर्भका इस स्वप्नको छोड़कर दूसरा कोई स्वप्न कभी भी नहीं हो सकता, इसलिए व्यष्टिरूप हम लोगोंके जाग्रत्-कालके प्रसिद्ध ये भूत-भुवनादिभाव उस हिरण्यगर्भकी भी जाग्रत् और स्वप्न दोनों अवस्थाओंमें उदित हुए तत्त्वतः स्वप्नसे भिन्न नहीं हैं, यह भाव है ॥ २ ॥

असत्यत्व और अवस्तुत्व—इन दोनों हेतुओंसे भी प्रपञ्चमें स्वप्नरूपताका

स्वप्नात्स्वप्नान्तरमिव गच्छन्तो जीवजीवकाः ।
असत्यमेव पश्यन्ति घनसत्यतयाऽनघ ॥ ४ ॥
अजडे जडता तात जडे चाऽजडतोदिता ।
असत्ये सत्यता जीवजीवानुभवमोहतः ॥ ५ ॥
भानोरप्यन्तरखिलं पश्यन्तस्त्रिजगद्भ्रमम् ।
भ्रमन्ति स्वप्नसंभ्रान्ता इव जीवा भिदालिभिः ॥ ६ ॥
सर्वगत्वादनन्तत्वात् स्वस्य जीवस्य जीवतः ।
यद्भावयन्ति चेतन्ति तदेवाऽऽश्विति सत्यवत् ॥ ७ ॥

साधन कर रहे महाराज वसिष्ठजी स्वप्न-वैधर्म्यानुभवमें कारण दिखलाते हैं—'जीवस्वप्न०' इत्यादिसे ।

तत्त्वज्ञोंमें श्रेष्ठ श्रीरामचन्द्रजी, तत्त्वज्ञानियोंकी दृष्टिमें असत्यभूत और अवस्तु-स्वरूप होनेके कारण भी इस संसारको उस समष्टि-जीवका (हिरण्यगर्भका)— व्यष्टिरूप हम लोगोंके स्वप्नके समान शीघ्र बाधका प्रतिभास न होनेसे—एक लम्बा स्वप्न ही समझिए । प्रपञ्चमें स्वप्न-वैधर्म्यका जो भ्रम होता है, उसमें उसकी दीर्घता ही एकमात्र कारण है, यह भाव है ॥ ३ ॥

हे अनघ, एक स्वप्नसे मानो दूसरे स्वप्नका अनुभव कर रहे समष्टि-जीवके एकदेशभूत व्यष्टि-जीव असत्य वस्तुका ही अकाट्य सत्यरूपसे अवलोकन किया करते हैं ॥ ४ ॥

वस्तुस्वभावसे वैपरीत्य दिखाई पड़नेके कारण भी इसकी स्वप्नता सिद्ध होती है, यह कहते हैं—'अजडे' इत्यादिसे ।

हे तात, समष्टि-जीवके एकदेशभूत जो व्यष्टि-जीव हैं, उनके अनुभवस्वरूप भ्रान्तिसे जड़ताशून्य ब्रह्ममें भूत-भुवनादिकी जड़ता, अहङ्कारसे लेकर देहपर्यन्त सभी जड-पदार्थोंमें आत्मत्वाभिमानसे अजड़ता एवं असत्यमें सत्यता उदित हुई है ॥ ५ ॥

प्रकाशके प्रकाशक ब्रह्मरूप सूर्यके भी भीतर सम्पूर्ण तीनों लोकोंका भ्रम देख रहे स्वप्नमें संभ्रान्त-से सब जीव भेद-कल्पनाओंकी परम्पराओंसे संसारमें भ्रमण किया करते हैं ॥ ६ ॥

कल्पित भेदोंमें सत्यताके आरोपमें कारण बतलाते हैं—'सर्वगत्वात्' इत्यादिसे ।

पुण्डरीकाक्षनिर्दिष्टामसंसक्तिगतिं शुभाम् ।
यामालिङ्ग्य महाबाहो जीवन्मुक्तो महामुनिः ॥ ८ ॥
पाण्डोः पुत्रोऽर्जुनो नाम सुखं जीवितमात्मनः ।
क्षिपयिष्यति निर्दुःखं तथा क्षेपय जीवितम् ॥ ९ ॥

श्रीराम उवाच

भविष्यति कदा ब्रह्मन् सोऽर्जुनः पाण्डुनन्दनः ।
कीदृशीं च हरिस्तस्य कथयिष्यत्यसक्तताम् ॥ १० ॥

वसिष्ठ उवाच

अस्ति सन्मात्रमात्मेति परिकल्पितनामकम् ।
स्थितमात्मन्यनाद्यन्ते नभसीव महानभः ॥ ११ ॥

स्वयं व्यष्टिरूप होनेके कारण ही समष्टि-जीवकी अपेक्षा भी अत्यन्त जीवभूत थे—परमार्थतः सर्वगामी और अनन्त, अतएव परिच्छेदशून्य—सत्यस्वरूप होनेके कारण जिस-जिस की भावना करते हैं; उसीको—उसमें आसक्ति होनेसे अपनी सत्ताके आरोप द्वारा—शीघ्र ही सत्य-सा समझ लेते हैं ॥ ७ ॥

यही अर्थ भगवद्गीतामें भगवान् द्वारा उपदिष्ट है, यह कहते हैं—'पुण्डरीकाक्ष०' इत्यादिसे ।

महाबाहो श्रीरामजी, भगवान् श्रीकृष्णचन्द्रसे उपदिष्ट, शुभफलदायक उस अनासक्ति-योगका आप श्रवण कीजिए, जिसका अवलम्बनकर प्राणी जीवन्मुक्त महामुनि बन जाता है ॥ ८ ॥

उसके लिए अर्जुनोपाख्यानकी भूमिका बाँधते हैं—'पाण्डोः' इत्यादिसे ।

श्रीरामचन्द्रजी, अर्जुन नामधारी महाराज पाण्डुका पुत्र जिस तरह जीवन्मुक्तिरूप सुखसे युक्त होता हुआ अपना जीवन शीघ्र बिता देगा, उसी तरह आप भी दुःखरहित अपना जीवन बिता दीजिए ॥ ९ ॥

श्रीरामचन्द्रजीने कहा—ब्रह्मन्, [कृपाकर आप मुझे बतलाइये कि] वह पाण्डुनन्दन [इस पृथिवीपर] कब उत्पन्न होगा और उसकी अनासक्तिका वर्णन भगवान् श्रीकृष्ण किस तरह करेंगे ? ॥ १० ॥

अर्जुनके अवतारमें कारण बतलानेके लिए सबके मूलभूत ब्रह्मका उपक्रम करते हैं—'अस्ति' इत्यादिसे ।

दृश्यते विमले तस्मिन्नयं संसारविभ्रमः ।
कटकादि यथा हेम्नि तरङ्गादि यथाऽम्भसि ॥ १२ ॥
चतुर्दशविधा भूतजातयः प्रस्फुरन्त्यलम् ।
तस्मिन् संसारजालेऽस्मिञ्जाले शकुनयो यथा ॥ १३ ॥
तत्रैते यमचन्द्रार्कशक्राद्याः शंसितक्रमाः ।
भूतपञ्चकसंसारलोकपालत्वमागताः ॥ १४ ॥
इदं पुण्यमुपादेयं हेयं पापमिदं त्विति ।
तैः स्वसङ्कल्पघटिताद्वेदनात् स्थापिता स्थितिः ॥ १५ ॥
तस्याऽद्य यावदनघ प्रवाहपतिते निजे ।
कर्मण्यचलसंकाशस्थिरं चित्तमवस्थितम् ॥ १६ ॥

महाराज वसिष्ठजीने कहा—श्रीरामचन्द्रजी, आकाशमें महाकाशकी नाईं परिकल्पित नामवाला सन्मात्रस्वरूप यह आत्मा आदि और अन्त से शून्य अपनी महिमामें ही प्रतिष्ठित है ॥ ११ ॥

जैसे सुवर्णमें कटक आदि तथा जलमें तरङ्ग आदि दिखाई पड़ते हैं, वैसे ही निर्मल, सन्मात्रस्वरूप परमात्मामें यह संसार-विभ्रम (जगद्विलास) दिखाई पड़ता है ॥ १२ ॥

जैसे जालमें फँसी हुई चिड़ियाँ भागनेमें असमर्थ होकर एकमात्र अपने पर फड़-फड़ाती रहती हैं, वैसे ही दृष्टिगोचर हो रहे इस संसाररूपी जालमें फँसी हुई चौदह प्रकारकी जीवजातियाँ छुटकारा पानेमें असमर्थ होकर आवश्यकतासे अधिक फुदक रही हैं यानी उछल-कूद मचा रही हैं ॥ १३ ॥

उन जीव-जातियोंके बीच पाञ्चभौतिक संसारमें श्रुति, स्मृति आदिसे वर्णित चरित्रवाले यम, चन्द्र, सूर्य, इन्द्र आदि तत्-तत् लोकके अधिपति हो चुके हैं ॥ १४ ॥

चूँकि श्रुति, स्मृति और सदाचार से विहित होनेसे यह पुण्य है, इसलिए उपादेय है (ग्राह्य है) तथा श्रुति, स्मृति और सदाचार से निषिद्ध होनेसे यह पाप है, इसलिए हेय है यानी त्याज्य है—यों उन लोगोंने अपने-अपने अधिकारके अनुसार सङ्कल्पघटित ज्ञानसे मर्यादा बना रक्खी है ॥ १५ ॥

ठीक है ! ऐसा ही सही, पर इससे प्रकृतमें क्या आया ? इसपर कहते हैं—'तस्या०' इत्यादिसे ।

भगवान् स यमः किञ्चिद्गते प्रतिचतुर्युगे ।
तपः प्रकुरुते भूतदलनात् पापशङ्कया ॥ १७ ॥
कदाचिदष्टौ वर्षाणि दश द्वादश वाऽपि च ।
कदाचित् पञ्च सप्तादि कदाचित् षोडशाऽपि च ॥ १८ ॥
उदासीनवदासीने तस्मिन्नियमसंस्थितौ ।
न हिनस्ति जगज्जाले मृत्युर्भूतानि कानिचित् ॥ १९ ॥
तेन नीरन्ध्रभूतौघनिःसञ्चारं महीतलम् ।
भवति प्रावृषि स्वेदी कुञ्जरो मशकैरिव ॥ २० ॥
अथैतानि विचित्राणि भूतानि बहुयुक्तिभिः ।
क्षिपयन्ति सुरा राम भुवो भारनिवृत्तये ॥ २१ ॥

हे अनघ, वक्ष्यमाण उस यमराजका चित्त सृष्टिके प्रारम्भसे लेकर आजतक प्रवाहपतित अपने अधिकार-कर्ममें, पर्वतके सदृश अडिग होकर, ज्योंका त्यों अवस्थित है ॥१६ ॥

वे भगवान् यमराज, प्रतिचतुर्युगमें कुछ समय समाप्त हो जानेपर या द्वापरके अन्तमें—जीवोंके नाशसे जनित पापकी आशङ्का होनेसे—कदाचित् कुछ तपस्या भी करते हैं ॥ १७ ॥

यमराजकी उस तपस्यामें समयका नियम नहीं है, यह कहते हैं—'कदाचित्' इत्यादिसे ।

कभी तो आठ वर्ष, कभी दस अथवा बारह वर्ष, कभी पाँच या सात वर्ष और कभी सोलह वर्षतक भी वे तपस्या करते रहते हैं ॥ १८ ॥

उस यमराजके उदासीनके समान तपस्यामें आसीन रहनेपर संसाररूपी जालमें फँसे हुए किन्हीं भी जीवोंका मृत्यु नाश नहीं करती ॥ १९ ॥

उस समय किसी एक भी प्राणीकी हिंसा न होनेके कारण यह पृथिवी—वर्षा-ऋतुमें मच्छड़ोंसे पसीनेसे तराबोर हाथीके समान—अनेकविध जीव-समूहोंसे सञ्चारके अयोग्य बन जाती है ॥ २० ॥

श्रीरामचन्द्रजी, तदनन्तर [जब यह पृथिवी प्राणियोंके भारसे दबने लगती है तब] उसपर पड़ी बोझकी निवृत्तिके लिए भगवान् कृष्णचन्द्र आदि सब देवता अनेक प्रकारकी युक्तियोंसे यानी अपने अंशावतार तथा महाभारतकी लड़ाई आदि अनेक उपायोंसे इन विचित्र प्राणियोंको मार डालते हैं ॥ २१ ॥

एवं युगसहस्राणि व्यवहारशतानि च ।
समतीतान्यनन्तानि भूतानि च जगन्ति च ॥ २२ ॥
वैवस्वतोऽद्य तु यमो य एष पितृनायकः ।
अनेन त्वधुना साधो परिक्षीणेषु केषुचित् ॥ २३ ॥
युगेष्वघविघाताय वर्षाणि द्वादशात्मना ।
व्रतचर्येह कर्तव्या दूरास्तजनकर्पणा ॥ २४ ॥
तेनेयमुर्वी नीरन्ध्रा भूतैर्मर्त्यैरमृत्युभिः ।
दीना प्रपन्नगुल्मेव भारभूतैर्भविष्यति ॥ २५ ॥
भूर्भारपरिभूताङ्गी हरिं शरणमेष्यति ।
कान्ता दस्युपराभूता दीना पतिमिव प्रिया ॥ २६ ॥
हरिर्देहद्वयेनाऽथ महीमवतरिष्यति ।
देवांशैरखिलैः सार्धं नरनारायणं गतैः ॥ २७ ॥

और यह भार उतारनेके लिए अवतारादि-व्यवहार भी अनेकबार हो चुका है, यह कहते हैं—'एवम्' इत्यादिसे ।

श्रीरामजी, इस तरह हजारों युग, सैकड़ों व्यवहार तथा अनन्त जीव एवं जगत् व्यतीत हो चुके हैं ॥ २२ ॥

हे साधो, यह जो वैवस्वत यम है, वह आज तो पितरोंका (मृतजीवोंका) नियामक है; [परन्तु] अब इसे भी किन्हीं युगोंके व्यतीत हो जानेपर [अपने] पापोंके विनाशके लिए बारह वर्षतक अहिंसादिघटित निर्विकल्पक समाधिरूप व्रतचर्या (तपश्चर्या) करनी पड़ेगी, जिसमें मनुष्योंका उत्पीडन कोसों दूर निकल जायगा यानी पापियोंका कोई दण्डदाता न रहेगा, यह भाव है ॥ २३, २४ ॥

उस व्रतचर्याके कारण यह पृथिवी मृत्युलोकमें आये हुए, भारस्वरूप, मृत्यु-रहित प्राणियोंसे व्याप्त वन-गुल्मोंसे सङ्कीर्ण-सी, अतएव दीन हो जायगी ॥ २५ ॥

उस समय मनुष्योंके भारसे परिपीडित अङ्गोंवाली यह दीन पृथिवी शरण पानेके लिए भगवान् विष्णुके समीप उस तरह आयेगी, जिस तरह लुटेरोंसे लूटी गई, अतएव कातर स्त्री अपने पतिके समीप आती है ॥ २६ ॥

तदनन्तर सम्पूर्ण देवांशोंके साथ, जो नर और नारायण के सहायतार्थ उत्पन्न होंगे, विष्णुभगवान् दो शरीरोंसे पृथिवीपर अवतार लेंगे ॥ २७ ॥

वसुदेवसुतस्त्वेको वासुदेव इति श्रुतः ।
देहो भविष्यति हरेर्द्वितीयः पाण्डवोऽर्जुनः ।। २८ ।।
युधिष्ठिर इति ख्यातो धर्मपुत्रो भविष्यति ।
अम्भोधिमेखलाभूपः पाण्डोः पुत्रः स धर्मवित् ।। २९ ।।
दुर्योधन इति ख्यातस्तस्य भ्राता पितृव्यजः ।
भविष्यति दृढद्वन्द्वो भीमो बभ्रुरहेरिव ।। ३० ।।
अन्योऽन्यं हरतोरुर्वीं तयोः सङ्ग्रामलोलयोः ।
अष्टादशाऽऽत्राक्षौहिण्यो घटिष्यन्त्यत्र भीषणाः ।। ३१ ।।
तत्क्षयेण विभारत्वं भुवो विष्णुः करिष्यति ।
राघवाऽर्जुनदेहेन बृहद्गाण्डीवधन्वना ।। ३२ ।।
विष्णोरर्जुननामादौ प्राकृतं भावमास्थितः ।
हर्षामर्षान्वितो देहो नरधर्मा भविष्यति ।। ३३ ।।

उनमें एक तो वसुदेवका पुत्र 'वासुदेव' इस नामसे विख्यात विष्णुका शरीर होगा और दूसरा शरीर होगा—पाण्डुका पुत्र 'अर्जुन' इस नामसे विख्यात ।। २८ ।।

और, चारों समुद्ररूपी करधनी पहनी हुई पृथिवीका अधिपति एवं धर्मका पुत्र 'युधिष्ठिर' इस नामसे प्रसिद्ध होगा । वह पाण्डुपुत्र 'धर्मज्ञ' होगा ।। २९ ।।

उसका चचेरा भाई 'दुर्योधन' नामसे विख्यात होगा । और उस दुर्योधनका वैसा ही प्रतिद्वन्द्वी योद्धा 'भीम' नामक द्वितीय पाण्डु-पुत्र होगा, जैसा सर्पका प्रतिद्वन्द्वी नकुल ।। ३० ।।

परस्पर पृथ्वीका अपहरण कर रहे, युद्ध करनेमें तत्पर उन दोनोंकी भयङ्कर अट्ठारह अक्षौहिणी सेना कुरुक्षेत्रमें होनेवाली महाभारतकी लड़ाईमें इकट्ठी होगी ।। ३१ ।।

हे राघव, महान् गाण्डीवधनुर्धारी अर्जुनकी देहसे उन सेनाओंको नष्टकर विष्णुभगवान् पृथ्वीको भारसे मुक्त कर देंगे ।। ३२ ।।

युद्धके प्रारम्भमें अर्जुननामधारी भगवान्‌विष्णुका शरीर प्राकृत भावमें स्थित होकर हर्ष और शोक से युक्त मनुष्यधर्मा बनेगा यानी अज्ञप्राय हो जायगा ।। ३३ ।।

सेनाद्वयगतान् दृष्ट्वा स्वजनान् मरणोन्मुखान् ।
विषादमेष्यत्युद्योगं युद्धाय न करिष्यति ॥ ३४ ॥
तमर्जुनाभिधं देहं प्राप्तकार्यैकसिद्धये ।
हरिर्बुद्धेन देहेन बोधयिष्यति राघव ॥ ३५ ॥
न जायते म्रियते वा कदाचि-
न्नाऽयं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥ ३६ ॥
य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतो नाऽयं हन्ति न हन्यते ॥ ३७ ॥

दोनों सेनाओंमें पहुँचे हुए और मरनेके लिए तैयार अपने बन्धुओंको देखकर वह अर्जुन विषादको प्राप्त होगा और न करेगा—युद्धके लिए उद्योग ॥ ३४ ॥

हे राघव, तब उस अर्जुननामक देहको, उपस्थित कार्यकी सिद्धिके लिए, श्रीविष्णुभगवान् स्वतःसिद्ध आत्मबोधवाली अपनी देहसे यानी श्रीकृष्ण-देहसे उपदेश देंगे ॥ ३५ ॥

उपदेशके प्रकारका ही विस्तारसे वर्णन करते हैं—'न जायते' इत्यादिसे ।

यह अज आत्मा न तो कभी उत्पन्न होता है और न कभी नष्ट ही होता है। [*आदि और अन्त के विकारोंका निषेध करनेपर प्रसक्त हुए मध्यतन चार विकारोंका अथवा भाविजन्म आदिका निषेध करते हैं—'नाऽयम्' से ।] यह न कभी जन्म पाकर पुनः अपने अस्तित्वको प्राप्त करता है और न कभी शरीरका खड्ग आदिसे छेदन करनेपर इसका छेदन ही होता है । यह अज, नित्य, शाश्वत और पुराण है ॥ ३६ ॥

जो पुरुष उक्तस्वभाव अहंपदार्थ आत्माको हनन-क्रियाका कर्ता समझता है

---

*तात्पर्य यह है कि १—जन्म, २—स्थिति, ३—वृद्धि, ४—विपरिमाण, ५—अपक्षय और ६—नाश—ये छः भावविकार हैं, जो ब्रह्ममें नहीं रहते । इसीलिए वह (आत्मा) नित्य, कूटस्थ, असङ्ग आदि कहा गया है । प्रस्तुत श्लोकमें यद्यपि 'अज' इस विशेषणसे ब्रह्ममें समस्तभावविकार-शून्यता अर्थतः सिद्ध हो जाती है; तथापि शब्दतः यहाँ प्रत्येक विकारका निषेध किया गया है । वहाँ 'न जायते' से पहले और 'न म्रियते' से अन्तिम भावविकारका ब्रह्ममें निषेध कर चुके; अब मध्यपतित चार भावविकारोंका निषेध करना भी प्रसङ्गप्राप्त है, जिसे 'नाऽयम्' से कर रहे हैं ।

अनन्तस्यैकरूपस्य सतः सूक्ष्मस्य खादपि ।
आत्मनः परमेशस्य किं कथं केन नश्यति ॥ ३८ ॥

अनन्तमव्यक्तमनादिमध्य-
मात्मानमालोकय संविदात्मन् ।
संविद्वपुः स्फारमलब्धदोष-
मजोऽसि नित्योऽसि निरामयोऽसि ॥ ३९ ॥

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मोक्षोपाये निर्वाणप्रकरणे अर्जुनोपाख्याने नरनारायणावतारकथनं नाम द्विपञ्चाशः सर्गः ॥ ५२ ॥

और जो पुरुष इसे (अहंपदार्थ आत्माको) हनन-क्रियाका विषय मानता है—वे दोनों आत्माको तत्त्वतः नहीं जानते, क्योंकि आत्मा न तो मरता है और न मारा ही जाता है। उन दोनोंकी हन्तृ-हन्तव्यताविषयक भ्रान्तिमें अज्ञान ही निमित्त है, यह भाव है ॥ ३७ ॥

अनन्त, एकरूप, सदात्मक और आकाशसे भी अत्यन्त सूक्ष्म परब्रह्म परमात्माका किससे किस तरह क्या नष्ट होता है ? ॥ ३८ ॥

हे ज्ञानात्मक पार्थ, तुम अनन्त, आदि और मध्य से रहित एवं अव्यक्त अपने स्वरूपका अवलोकन करो। तुम अपरिच्छिन्न आकारवाले, अतएव किसी प्रकारके दोषको न प्राप्त किये हुए चैतन्यस्वरूप ही हो। यही कारण है कि तुम अज हो, नित्य हो और हो—निरामय यानी अज्ञान और उसके कार्य से निर्मुक्त ; अतः बन्धुओंमें आसक्ति और उनके मरण आदिकी सम्भावनासे दुःख करना तुम्हें उचित नहीं, यह भाव है ॥ ३९ ॥

बावनवाँ सर्ग समाप्त

त्रिपञ्चाशः सर्गः

श्रीभगवानुवाच

अर्जुन त्वं न हन्ता त्वमभिमानमलं त्यज ।
जरामरणनिर्मुक्तः स्वयमात्माऽसि शाश्वतः ॥ १ ॥
यस्य नाऽहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वाऽपि स इमाँल्लोकान्न हन्ति न निबध्यते ॥ २ ॥

तिरपनवाँ सर्ग

[अहङ्कारका त्याग, सङ्गत्याग आदिका लक्षण और दशाओंके भेदसे व्यवस्थित उपास्य और ज्ञेयका स्वरूप—इन सबका वर्णन]

'अपने बन्धुओंको मारनेवाला मैं हूँ' इस प्रकारका अहन्ताभिमान तथा 'ये मेरे ही बान्धव हैं' इत्यादिरूप ममताभिमान ही तुम्हारे सब दुःखोंके मूलकारण हैं, इसलिए सर्वप्रथम उन्हें ही तुम छोड़ दो, यह कहते हैं—'अर्जुन' इत्यादिसे ।

भगवान् श्रीकृष्णने कहा—हे अर्जुन, यतः तुम जन्म-मरण आदि छः ऊर्मियोंसे निर्मुक्त हो, अतएव नित्य हो और अपने भाई-बन्धुओं तथा सम्पूर्ण भूतोंके स्वयं साक्षात् आत्मरूप हो, अतः तुम किसीको मारनेवाले नहीं हो । 'मैं हनन करनेवाला हूँ' इस प्रकारके अभिमानको भलीभाँति छोड़ दो ॥ १ ॥

अभिमान-त्यागका फल कहते हैं—'यस्य' इत्यादिसे ।

वधादिप्रवृत्तिकालमें जिस पुरुषमें 'मैं इसे मारता हूँ' यों अभिमान नहीं होता और उसके (वधादिके) उत्तरकालमें जिसकी बुद्धि उसके फल हर्ष, शोक आदिसे लिप्त नहीं होती, वह पुरुष सम्पूर्ण चतुर्विध भूतजातियोंको मारकर भी किसी एकको भी नहीं मारता; क्योंकि सर्वत्र वधादि विकारके स्पर्शसे रहित शाश्वत एकात्मतत्त्व अविकारी ही है तथा मायामात्र होनेसे देह आदिके सदा असद्रूप होनेके कारण ही वन्ध्यापुत्रकी नाईं वधमें उसकी प्रसक्ति नहीं है। इसलिए ईश्वरके समान तत्प्रयुक्त पापफलसे भी वह निबद्ध नहीं होता, यह भाव है ॥ २ ॥

यैव सञ्जायते संविदन्तः सैवाऽनुभूयते ।
अयं सोऽहमिदं तन्म इत्यन्तः संविदं त्यज ॥ ३ ॥
अनयैव च युक्तोऽस्मि नष्टोऽस्मीति च भारत ।
अभितः सुखदुःखाभ्यामवशः परितप्यसे ॥ ४ ॥
स्वात्मांशैः क्रियमाणानि गुणैः कर्माणि भागशः ।
अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते ॥ ५ ॥
चक्षुः पश्यतु कर्णश्च शृणोतु त्वक् स्पृशत्विदम् ।
रसना च रसं यातु काऽत्र कोऽहमिति स्थितिः ॥ ६ ॥

हन्तृत्वादि धर्मवाले देहादिमें तादात्म्य-भ्रम होनेसे ही देहके धर्म हन्तृत्वादिका आत्मामें प्रतिभास होता है, न कि स्वतः । अतः सबसे पहले उसीका त्यागकर दो, यह कहते हैं—'यैव' इत्यादिसे ।

हृदय-स्थित आत्मामें देहाद्यभिमानरूपा या और किसी दूसरी तरहकी जो ही बुद्धिवृत्ति उत्पन्न होती है, वही अनुभूत होती है । अतः 'अयम्' यानी कार्यकरणसमूह, 'सोऽहम्' यानी मारनेवाला मैं, 'इदम्' यानी इस देह आदिके सम्बन्धी और 'तन्मे' यानी वे बन्धु आदि मेरे हैं, इस तरहकी अन्दर उत्पन्न हुई भ्रान्तिवृत्तिका त्याग कर दो ॥ ३ ॥

हे भारत, इसी बुद्धिवृत्तिके कारण 'मैं हन्तृत्वादि धर्मोंसे युक्त हूँ,' 'हन्तृत्वादि-प्रयुक्त पापोंसे मैं नष्ट हूँ' तथा 'अपने बन्धुओंके नाशादिरूप ऐहिक अनर्थों एवं नरकपात आदि पारलौकिक अनर्थों से मैं ग्रस्त हूँ' इत्यादि भ्रान्तियोंसे पराधीन होकर तुम चारों ओर सुख-दुःखोंसे परितप्त हो रहे हो ॥ ४ ॥

अंशोंके सदृश स्वात्माके परिच्छेदक होनेके कारण अंशरूप देह, इन्द्रिय आदि जो सत्त्वादि गुणोंके विकार हैं, एकमात्र उन्हींसे ये सारे कर्म विभागशः किये जाते हैं । परन्तु अहङ्कारसे विमोहित अन्तःकरणवाला पुरुष 'मैं ही करनेवाला हूँ' यों मानता है ॥ ५ ॥

विचार करनेपर तो रूपादि विषयोंमें आँख आदि इन्द्रियोंकी ही प्रवृत्ति है, न कि आत्माकी । इसलिए नेत्र आदि इन्द्रियों द्वारा किये गये कार्योंसे आत्मा कर्ता नहीं कहा जा सकता, इस आशयसे कहते हैं—'चक्षुः' इत्यादिसे ।

कलनाकर्मणि रते मनस्यपि महात्मनः ।
न कश्चिदत्राऽहमिति क्लेशभागे क एव ते ॥ ७ ॥
बहुभिः समवायेन यत्कृतं तत्र भारत ।
एकोऽभिमानदुःखेन हासायैव हि गृह्यते ॥ ८ ॥
कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये ॥ ९ ॥

आँखें देखा करें, कान सुना करें, ये त्वचाएँ स्पर्श किया करें और जिह्वा रसास्वाद लिया करे, इनमें (चक्षुरादि-करणकार्यसमूहमें) मैं कौन हूँ ? अर्थात् उनमें मद्रूप तो कोई है ही नहीं, अतः उनमें मुझे 'मैं' इस रूपसे स्थिति करना युक्त नहीं है। तात्पर्य यह है कि चक्षु आदि कार्यकरणसंघात ही सब कुछ करनेवाला है, उसमें मद्रूप कोई है ही नहीं; अतः 'मैं कर्ता हूँ' यह अभिमान करना सर्वथा अयुक्त है ॥ ६ ॥

इस मन आदि अन्तःकरणसंघातके सङ्कल्पादिरूप अपने कार्यमें तत्पर रहनेपर भी 'उसमें मैं कोई नहीं हूँ' यों देख रहे तुम महात्माकी दृष्टिमें ऐसा कौन पदार्थ क्लेशभागमें प्रविष्ट है, जिसके विषयमें तुम शोक कर रहे हो अर्थात् कोई है ही नहीं ॥ ७ ॥

किसी जनसमुदाय द्वारा कोई एक कार्य किया गया हो, वहाँपर उस समुदायका हरएक पुरुष अपनेमें समुदायाभिमान कर यदि उस कार्यके विषयमें जब शोक करता है तो उपहास्य हो जाता है, तब समुदायमें न रहनेवाला बाहरका कोई यदि उस विषयमें शोक करे तो उसकी उपहास्यतामें कहना ही क्या ? इस आशयसे कहते हैं—'बहुभिः' इत्यादिसे ।

हे भारत, बहुतोंने मिलकर एक साथ जिस कार्यका सम्पादन किया हो, उसमें यदि किसी एकको 'मैंने ही किया है', यों अभिमानजन्य दुःख पकड़ लेता है तो वह हँसीके लिए ही होता है † ॥ ८ ॥

किञ्च, निरहङ्कारी पुरुषका फलकी अभिलाषासे रहित, कायिक, वाचिक और मानसिक कर्म चित्तशुद्धि द्वारा ज्ञानका उद्दीपक होनेसे परमपुरुषार्थके लि

---

† इस विषयमें कहा भी गया है कि समुदायसे जनित दुःखके लिए समुदायवर्ती किसी एकको शोच करना ठीक नहीं होता—'न सामवायिक दुःखमेकः शोचितुमर्हति' ।

अहन्त्वविषचूर्णेन येषां कायो न मारितः ।
कुर्वन्तोऽपि हरन्तोऽपि न च ते निर्विषूचिकाः ॥ १० ॥

न क्वचिद्राजते कायो ममतामेध्यदूषितः ।
प्राज्ञोऽप्यतिबहुज्ञोऽपि दुःशील इव मानवः ॥ ११ ॥

निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ।
यः स कार्यमकार्यं वा कुर्वन्नपि न लिप्यते ॥ १२ ॥

इदं च ते पाण्डुसुत स्वकर्म क्षात्रमुत्तमम् ।
अपि क्रूरमतिश्रेयः सुखायैवोदयाय च ॥ १३ ॥

ही होता है । इसलिए हे अर्जुन, तुम्हें स्वधर्मस्वरूप युद्धसे दुःखप्रसक्ति नहीं है, यह कहते हैं—'कायेन' इत्यादिसे ।

योगी लोग (आरुरुक्षु या मुमुक्षु लोग) देहसे, मनसे, बुद्धिसे और केवल इन्द्रियोंसे भी फलकी अभिलाषाका त्यागकर आत्मशुद्धिके लिए कर्म करते हैं ॥९॥

जिसका शरीर अहन्तारूपी विषचूर्णसे मारणके लिए व्यापारित नहीं हुआ है, यानी बारबार मरणके हेतुभूत भोगोंमें लम्पट नहीं हुआ है, ऐसे रागादिरूपी हैजेसे निर्मुक्त योगी लौकिक एवं शास्त्रीय कर्म कर रहे तथा उसके आनुषङ्गिक फलका उपभोग कर रहे भी परमार्थतः न तो कर्म कर रहे हैं और न उसके फलका उपभोग ही कर रहे हैं ॥ १० ॥

प्राज्ञ होनेपर भी, अतिबहुज्ञानी होनेपर भी दुष्टप्रकृति पुरुष जैसे कहीं (लौकिक या शास्त्रीय व्यवहारोंमें) नहीं शोभता, वैसे ही ममतारूपी दोषसे दूषित शरीर कहीं (लौकिक या शास्त्रीय प्रसङ्गोंमें) नहीं शोभता यानी परम पुरुषार्थके समर्थ नहीं होता ॥ ११ ॥

जो ममतारहित, अहङ्कारसे शून्य, सुख और दुःख होनेपर हर्ष-विषादसे रहित तथा क्षमावान् है, वह अवश्यकर्तव्य (शास्त्रीय कर्म) अथवा अनवश्यकर्तव्य (लौकिक कर्म) कर रहा भी उनसे लिप्त नहीं होता ॥ १२ ॥

हे पाण्डुपुत्र, तुम्हारा यह उत्तम क्षात्र कर्म यानी क्षत्रियोंके लिए शास्त्रविहित युद्धमें पीठ न दिखाना आदि अपना कर्म है । वह बन्धुवधरूप होनेसे क्रूर होता हुआ भी चित्तशुद्धि द्वारा ब्रह्मज्ञानादिरूप सुखका साधन तथा धर्म, यश, राज्य, स्वर्ग आदि अभ्युदयका साधन होनेसे अतिकल्याणरूप ही है ॥ १३ ॥

अपि कुत्सितमप्यन्यदप्यधर्ममयक्रमम् ।
श्रेष्ठं ते स्वं यथा कर्म तथेहाऽमृतवान् भव ॥ १४ ॥
मूर्खस्याऽपि स्वकर्मैव श्रेयसे किमु सन्मतेः ।
मतिर्गलदहङ्कारा पतिताऽपि न लिप्यते ॥ १५ ॥
योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
निःसङ्गस्त्वं यथाप्राप्तकर्मवान्न निबध्यते ॥ १६ ॥

तब तो बन्धुवधसे अतिरिक्त द्रोण, भीष्म, कृपाचार्य आदि गुरुजनोंका वधरूप जो कुत्सित कर्म है, वह भला मुझसे कैसे किया जा सकता है ? इस प्रकारकी गुरुवधमें हुई अर्जुनकी अधर्मत्वशङ्काका सत्यशपथग्रहणपूर्वक आशीर्वाद देते हुए निवारण कर रहे भगवान् कहते हैं—'अपि' इत्यादिसे ।

और दूसरा भी यानी पूजनीय महानुभावोंके ऊपर उनके विरुद्ध शस्त्र उठाना आदि अधर्मप्रचुरक्रमसे युक्त कुत्सित भी तुम्हारा युद्धकर्म, जैसे यानी जिस सत्यस्वरूप शास्त्रप्रामाण्यसे श्रेष्ठ है, वैसे ही यानी उसी सत्यसे तुम इस युद्धमें अमरणधर्मा विजयी बन जाओ ॥ १४ ॥

जब अज्ञानीका भी स्वधर्म श्रेयके लिए है; तब तत्त्वज्ञानीको स्वधर्मसे नरकादि-प्रसक्ति तो किसी तरह हो ही नहीं सकती; पातित्यको उत्पन्न करनेवाले करोड़ों भी महापातक अहङ्काररहित पुरुषकी बुद्धिको लिप्त नहीं कर सकते, इस आशयसे कहते हैं—'मूर्खस्याऽपि' इत्यादिसे ।

जब मूर्खका भी अपना कर्म श्रेयके ही लिए है तब बुद्धिमान्के स्वकर्मके लिए तो कहना ही क्या ! अहङ्कारसे निर्मुक्त बुद्धिमान्की बुद्धि तो पतित होनेपर भी महापातकोंसे लिप्त नहीं होती ॥ १५ ॥

किञ्च, राज्यलाभ आदि लोभप्रयुक्त युद्धमें 'लोभमूलानि पापानि रसमूलास्तथा-मयाः' इस न्यायसे कदाचित् अधर्मकी प्रसक्ति हो भी सकती है; परन्तु योगमें—जो कि सिद्धि और असिद्धि में समभाव रहना ही है—स्थित हुए योगीकी तो फलमें आसक्ति न रहनेसे प्रसक्ति ही नहीं है । इसलिए उस योगस्थितिका भगवान् उपदेश देते हैं—'योगस्थः' इत्यादिसे ।

हे धनञ्जय, ब्रह्मभावापन्न होकर, सङ्गका त्यागकर तुम कर्मोंको करो, क्योंकि आसक्तिरहित होकर यथाप्राप्त कर्म करनेवाला उनके फलोंसे निबद्ध नहीं होता ॥ १६ ॥

शान्तब्रह्मवपुर्भूत्वा कर्म ब्रह्ममयं कुरु ।
ब्रह्मार्पणसमाचारो ब्रह्मैव भवसि क्षणात् ॥ १७ ॥
ईश्वरार्पितसर्वार्थ ईश्वरात्मा निरामयः ।
ईश्वरः सर्वभूतात्मा भव भूषितभूतलः ॥ १८ ॥
संन्यस्तसर्वसङ्कल्पः समः शान्तमना मुनिः ।
संन्यासयोगयुक्तात्मा कुर्वन् मुक्तमतिर्भव ॥ १९ ॥

अर्जुन उवाच

सङ्गत्यागस्य भगवंस्तथा ब्रह्मार्पणस्य च ।
ईश्वरार्पणरूपस्य संन्यासस्य च सर्वशः ॥ २० ॥

अथवा ब्रह्मार्पणबुद्धिसे, जिसका लक्षण आगे चलकर किया जायगा, सम्पादित हुआ वह शास्त्रीय कर्म तुम्हारे संसार-बन्धनके लिए नहीं होगा; यह कहते हैं—'शान्त०' इत्यादिसे ।

शान्त ब्रह्मशरीर होकर कर्मको ब्रह्ममय कर दो । अपने सत्कर्मोंको ब्रह्मार्पण कर देनेपर तुम शीघ्र ब्रह्म ही हो जाओगे ॥ १७ ॥

निर्विशेष ब्रह्मतत्त्वके ज्ञानसे अथवा उसकी असामर्थ्यमें (निर्विशेष ब्रह्मके तत्त्वज्ञानमें समर्थ न होनेपर) सगुण ईश्वरके प्रति कर्म-समर्पणबुद्धिसे कर्म करो । उससे भी कर्मबन्ध नहीं होगा, यह कहते हैं—'ईश्वरा०' इत्यादिसे ।

पार्थ, शुभ या अशुभ रूप अपने सब अर्थोंको ईश्वरमें समर्पित कर तथा अपनी आत्माको भी ईश्वरमें समर्पित कर निरामय (सांसारिक सुख, दुःख, राग, द्वेष, आदिरूप व्याधियोंसे रहित) होते हुए एवं सर्वभूतोंकी आत्मा बनकर इस भूतलको विभूषित करते हुए तुम ईश्वर हो जाओ ॥ १८ ॥

अथवा, सर्वसङ्कल्पत्यागरूपी संन्यासयोगमें आत्माको लगा देनेसे भी तुम्हें कर्मबन्धनकी प्रसक्ति नहीं होगी, यह कहते हैं—'संन्यस्त०' इत्यादिसे ।

अर्जुन, तुम सभी सङ्कल्पोंका त्याग कर चुके, इसलिए अब समस्वरूप, शान्तचित्त मुनि बनकर कर्मफलत्यागरूपी संन्यासयोगमें आत्माको युक्त करके कर्म कर रहे तुम मुक्तमति हो जाओ ॥ १९ ॥

इस तरह उपदेश प्राप्त कर चुके अर्जुन, तत्-तत् लक्षणोंसे सङ्ग और त्याग आदिका विभाग जाननेके इच्छुक होकर, पूछते हैं—'सङ्गत्यागस्य' इत्यादि दो श्लोकोंसे ।

तथा ज्ञानस्य योगस्य विभागः कीदृशः प्रभो ।
क्रमेण कथयैतन्मे महामोहनिवृत्तये ॥ २१ ॥

श्रीभगवानुवाच

सर्वसङ्कल्पसंशान्तौ प्रशान्तघनवासनम् ।
न किञ्चिद्भावनाकारं यत्तद्ब्रह्म परं विदुः ॥ २२ ॥
तद्ध्योगं विदुर्ज्ञानं योगं च कृतबुद्धयः ।
ब्रह्म सर्वं जगदहं चेति ब्रह्मार्पणं विदुः ॥ २३ ॥
अन्तःशून्यं बहिःशून्यं पाषाणहृदयोपमम् ।
शान्तमाकाशकोशाच्छं न दृश्यं न दृशः परम् ॥ २४ ॥

अर्जुनने कहा—भगवन्, सङ्ग-त्यागका, ब्रह्मार्पणका, ईश्वरार्पणरूपका, सर्वथा संन्यासका तथा ज्ञान और योग का विभाग कैसा है ? । हे प्रभो, मेरे महामोहकी निवृत्तिके लिए यह सब क्रमशः कहिए ॥ २०, २१ ॥

तत्त्वपरिज्ञानके बिना आत्यन्तिक सङ्गत्याग नहीं हो सकता, इसलिए भगवान् श्रीकृष्णचन्द्रजी लक्षण द्वारा पहले ब्रह्मात्मतत्त्वका ही निर्देश करते हैं—'सर्व०' इत्यादिसे ।

श्रीभगवान्‌ने कहा—सब सङ्कल्पोंकी (कामनाओंकी) संशान्ति हो जानेपर सघन वासनाओंसे रहित, अतएव भावना करने योग्य कुछ भी रूप न रखनेवाला जो विशुद्ध चिन्मात्रतत्त्व है, वही परब्रह्म कहा गया है ॥ २२ ॥

ब्रह्माकारसे परिपूर्ण चित्तकी वृत्तिको, जो कि अज्ञानकी निवृत्तिरूप फलसे उपहित है, परिपक्व बुद्धिवालोंने ज्ञान कहा है । और अज्ञाननिवृत्त्युपहित ब्रह्माकारके अनुकूल प्रवाहमात्रस्वरूप चित्तवृत्तिको तो योग कहा है । [अभिमानके विषय जगत् और अभिमान करनेवाले अहङ्कार का ब्रह्ममें बाध ही मुख्य ब्रह्मार्पण है, यह कहते हैं,—'ब्रह्म' से ।] तथा 'सम्पूर्ण संसार ब्रह्म ही है', और 'मैं ब्रह्मरूप हूँ'—इस प्रकारके बाधको ब्रह्मार्पण कहा है ॥ २३ ॥

ब्रह्ममें जगत् और अहङ्कार—इन दोनोंके बाधकी उपपत्तिके लिए उसमें अध्यस्तता कहनेके लिए ब्रह्मस्वरूप कहते हैं—'अन्तःशून्यम्' इत्यादिसे ।

वह ब्रह्म भीतर शून्य है, बाहर भी शून्य है और उसकी उपमा पत्थरके हृदयसे दी जा सकती है । वह शान्तस्वरूप है, आकाश-कोशके समान अत्यन्त

तत ईषद्यदुत्थानमीषदन्यतयोदितम् ।
स जगत्प्रतिभासोऽयमाकाशमिव शून्यता ॥ २५ ॥
भावोऽहमिति कोऽप्येष प्रत्येकमुदितश्चितेः ।
कोटिकोट्यंशकलितः क इवैनं प्रति ग्रहः ॥ २६ ॥
अपृथग्भूत एवैष पृथग्भूत इव स्थितः ।
पृथक्त्वं हि न पर्यन्तो नाऽहमित्यवगच्छति ॥ २७ ॥

स्वच्छ है। वह दृश्यस्वरूप नहीं है [सम्पूर्ण दृश्योंका निषेध हो जानेपर दृश्य-स्वरूप होनेके कारण द्रष्टाका भी निषेध क्यों नहीं होगा ? ऐसी आशङ्का कर कहते हैं—'न दृशः परम्' से ।] और न है द्रष्टासे अलग । द्रष्टामें दृश्यताका निषेध उस समय हो सकता, जब द्रष्टाके अतिरिक्त कोई दूसरा द्रष्टा होता, वह तो है नहीं, यह भाव है ॥ २४ ॥

तादृशस्वभाव ब्रह्मसे कुछ दूसरे रूपसे उदित जो कुछ थोड़ा-सा समुत्थान है, वही यह जगत्का प्रतिभास है। और वह गन्धर्वनगरके आकाशकी नाईं शून्यस्वरूप ही है ॥ २५ ॥

